শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অযোধ্যাকাণ্ডে

# ॥ ত্রযোদশাধিকশততমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ত্রযোদশাধিকশততমঃ সর্গঃ ॥

## ভরদ্ৱাজেন সহ মিলিৎৱা ভরতস্যাযোধ্যাং প্রতি নিৱর্ত্তনম্

ততঃ শিরসি কৃৎৱা তু পাদুকে ভরতস্তদা।
আরুরোহ রথং হৃষ্টঃ শত্রুঘ্নসহিতস্তদা॥ **2.113.1** ॥

ৱসিষ্ঠো ৱামদেৱশ্চ জাবালিশ্চ দৃঢৱ্রতঃ।
অগ্রতঃ প্রযযুঃ সর্ৱে মন্ত্রিণো মন্ত্রপূজিতাঃ॥ **2.113.2** ॥

মন্দাকিনীং নদী রম্যাং প্রাঙ্মুখাস্তে যযুস্তদা।
প্রদক্ষিণং চ কুর্ৱাণাশ্চিত্রকূটং মহাগিরিম্॥ **2.113.3** ॥

পশ্যন্ ধাতুসহস্রাণি রম্যাণি ৱিৱিধানি চ।
প্রযযৌ তস্য পার্শ্ৱেন সসৈন্যো ভরতস্তদা॥ **2.113.4** ॥

অদূরাচ্চিত্রকূটস্য দদর্শ ভরতস্তদা।
আশ্রমং যত্র স মুনির্ভরদ্ৱাজঃ কৃতালযঃ॥ **2.113.5** ॥

স তমাশ্রমমাগম্য ভরদ্ৱাজস্য ৱীর্যৱান্।
অৱতীর্য রথাৎ পাদৌ ৱৱন্দে কুলনন্দনঃ॥ **2.113.6** ॥

ততো হৃষ্টো ভরদ্ৱাজো ভরতং ৱাক্যমব্রৱীৎ।
অপি কৃত্যং কৃতং তাত রামেণ চ সমাগতম্॥ **2.113.7** ॥

এৱমুক্তঃ স তু ততো ভরদ্বাজেন ধীমতা।
প্রত্যুৱাচ ভরদ্বাজং ভরতো ধর্মৱৎসলঃ॥ **2.113.8**॥

স যাচ্যমানো গুরুণা মযা চ দৃঢৱিক্রমঃ।
রাঘৱঃ পরমপ্রীতো ৱসিষ্ঠং ৱাক্যমব্রৱীৎ॥ **2.113.9**॥

পিতুঃ প্রতিজ্ঞাং তামেৱ পালযিষ্যামি তত্ত্বতঃ।
চতুর্দশ হি ৱর্ষাণি যা প্রতিজ্ঞা পিতুর্মম॥ **2.113.10**॥

এৱমুক্তো মহাপ্রাজ্ঞো ৱসিষ্ঠঃ প্রত্যুৱাচ হ।
ৱাক্যজ্ঞো ৱাক্যকুশলং রাঘৱং ৱচনং মহৎ॥ **2.113.11**॥

এতে প্রযচ্ছ সংহৃষ্টঃ পাদুকে হেমভূষিতে।
অযোধ্যাযাং মহাপ্রাজ্ঞ যোগক্ষেমকরো ভৱ॥ **2.113.12**॥

এৱমুক্তো ৱসিষ্ঠেন রাঘৱঃ প্রাঙ্মুখঃ স্থিতঃ।
পাদুকে হেমৱিকৃতে মম রাজ্যায তে দদৌ॥ **2.113.13**॥

নিৱৃত্তোঽহমনুজ্ঞাতো রামেণ সুমহাত্মনা।
অযোধ্যামেৱ গচ্ছামি গৃহীৎৱা পাদুকে শুভে॥ **2.113.14**॥

এতচ্ছ্রুৎৱা শুভং ৱাক্যং ভরতস্য মহাত্মনঃ।
ভরদ্বাজঃ শুভতরং মুনির্ৱাক্যমুদাহরৎ॥ **2.113.15**॥

নৈতচ্চিত্রং নরৱ্যাঘ্রে শীলৱৃত্তৱিদাং ৱরে।
যদার্যং ৎৱযি তিষ্ঠেত্তু নিম্নোৎসৃষ্টমিৱোদকম্॥ **2.113.16**॥

অনৃণঃ স মহাবাহুঃ পিতা দশরথস্তৱ।
যস্য ৎৱমীদৃশঃ পুত্রো ধর্মাত্মা ধর্মৱৎসলঃ॥ **2.113.17**॥

তমৃষিং তু মহাপ্রাজ্ঞমুক্তৱাক্যং কৃতাঞ্জলিঃ।
আমন্ত্রযিতুমারেভে চরণাৱুপগৃহ্য চ॥ **2.113.18**॥

ততঃ প্রদক্ষিণং কৃৎৱা ভরদ্বাজং পুনঃ পুনঃ।
ভরতস্তু যযৌ শ্রীমানযোধ্যাং সহ মন্ত্রিভিঃ॥ **2.113.19**॥

যানৈশ্চ শকটৈশ্চৈৱ হযৈর্নাগৈশ্চ সা চমূঃ।
পুনর্নিৱৃত্তা ৱিস্তীর্ণা ভরতস্যানুযাযিনী॥ **2.113.20**॥

ততস্তে যমুনাং দিৱ্যাং নদীং তীর্ত্ৱোর্মিমালিনীম্।
দদৃশুস্তাং পুনঃ সর্ৱে গঙ্গাং শিৱজলাং নদীম্॥ **2.113.21**॥

তাং রম্যজলসম্পূর্ণাং সন্তীর্য সহবান্ধৱঃ।
শৃঙ্গৱেরপুরং রম্যং প্রৱিৱেশ সসৈনিকঃ॥ **2.113.22**॥

শৃঙ্গৱেরপুরাদ্ ভূয অযোধ্যাং সন্দদর্শ হ।
অযোধ্যাং তু তদা দৃষ্টৱা পিত্রা ভ্রাত্রা ৱিৱর্জিতাম্॥ **2.113.23**॥

ভরতো দুঃখসন্তপ্তঃ সারথিং চেদমব্রৱীৎ।
সারথে পশ্য ৱিধ্ৱস্তা অযোধ্যা ন প্রকাশতে॥ **2.113.24**॥

নিরাকারা নিরানন্দা দীনা প্রতিহতস্ৱনা॥ **2.113.25**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
অযোধ্যাকাণ্ডে ত্রযোদশাধিকশততমঃ সর্গঃ॥